ईसवीये **मूर्तिपूजा वेदविरुद्धा** इति विषयमाश्रित्य तस्य काशीस्थैः विद्वद्भिः शास्त्रार्थो बभूव। तत्र च विजयश्रीरेनम् अवृणोत्। तस्य विजयोद्घोषः तदानीन्तनैः समाचारपत्रैः पायोनीयर-हिन्दु-ज्ञानप्रदायिनी-प्रभृतिभिः प्रसारितः। अनेन महाभागेन वैदिकधर्मस्य प्रचारप्रसारार्थम् 12 अप्रैल, 1885 ईसवीये शनिवासरे मुम्बईनगरे सर्वप्रथमम् आर्यसमाजस्य स्थापना विहिता। भारतवर्षस्य विभिन्नप्रदेशेषु प्रचारादिविधिना वैदिकधर्मसिद्धान्तान् प्रामाण्यम्। स्वामीदयानन्देन स्त्रीषु शिक्षायाः प्रचारविषये अतीव प्रयत्नः कृतः। यद्यपि अनेन महापुरुषेण स्व-सम्पूर्णमेव जीवनं स्वदेशजातिराष्ट्रकल्याणाय अर्पितम्। जोधपुरनगरे 29 सितम्बर, 1883 ईसवीये नन्दीनाम्न्या वेश्याया वशगो भूत्वाऽस्य पाचको जगन्नाथो दुग्धे विषं सम्मिश्र्यैनं प्रादात्। ततश्च सः 30 सितम्बर, 1883 ईसवीये मङ्गलवासरे दीपावलिपर्वणि दिवसे पञ्चतत्वं प्राप्तवान्।

**महर्षिदयानन्दस्य कृतयः**—मानवजनानां शारीरिकं मानसिकं सामाजिकम् अभ्युदयम् एव आर्यसमाजस्य महद् उद्देश्यम् आसीत्। महर्षिदयानन्देन 1.ऋग्वेदभाष्यम्, 2.यजुर्वेदभाष्यम्, 3.ऋग्वेदभाष्यभूमिका, 4.सत्यार्थप्रकाशः, 5.संस्कारविधिः, 6.गोकरुणानिधिः, 7.व्यवहारभानुः, 8.आर्याभिविनयः, 9.पञ्चमहायज्ञविधिः, 10.वेदान्तिध्वान्तनिर्धारणम्, 11.अद्वैतमतखण्डनम्, 12.भ्रमोच्छेदनं, इत्यादयः ग्रन्थाः विरचिताः। तत्र नैरुक्तप्रक्रियाम् आश्रित्य कृतं वेदभाष्यं वेदानां गौरवं सर्वज्ञाननिधानत्वं च प्रतिष्ठापयति। स्वामीमहोदयस्य सत्यार्थप्रकाशः विश्ववाङ्मयस्य प्रकाश-स्तम्भः वर्तते।

**समाजसुधारको दयानन्दः**—धन्या इयं भारतभूमिः यत्र सङ्कटापन्ने जनानां कृते सन्मार्गं प्रदर्शयितुं अनेके महापुरुषाः काले-काले जन्म अलभन्त। देशे समाजसुधारकेषु स्वामीदयानन्दो मूर्धन्यः। तस्य सर्वोत्कृष्टत्वं समाजसुधारकार्येषु पाश्चात्यैः अपि मनीषिभिः साह्लादम् उद्घोष्यते। स महर्षिः एव जन्ममूलां जातिप्रथां निरस्य गुणकर्मानुसारं वर्णव्यवस्थां वेदाभिमताम् अघोषयत्। समाजे प्रचलितं बद्धमूलम् अनर्थमूलं च सर्वविधमपि पाषण्डं प्रपञ्चम्, धार्मिकमन्धानुकरणम्, अन्धविश्वासं भूतप्रेतादिप्रवादं च निराकरोत्। मूर्तिपूजैव सर्वविधायाः पाषण्डपरम्पराया अधारभूतेति निर्णीय, अस्या वेदविरुद्धत्वं च अवगत्य, युक्ति-प्रमाण-पुरःसरं मूर्तिपूजाम् अखण्डयत्। मृतानां पितृणां श्राद्ध-तर्पणादिविधिः अपि वेदविरुद्ध एवेति स प्रत्यपादयत्। जीवितपितृणां सेवां कर्तुम् आदिदेश। मातृशक्तेः उन्नतिमन्तरेण न देशोन्नतिः सम्भवतीति विचारं-विचारं स्त्रीशिक्षायां बलं न्यधात्। स एव स्त्रीशिक्षायाः सर्वप्रथमप्रचारकत्वेन अभिनन्द्यते। प्राचीनतमं गार्गीप्रभृतिविदुषीकुलमूर्धन्यानाम् इतिहासमुद्भावयन् तेन 'स्त्रीशूद्रौ नाधीयाताम्' एतस्य अक्षरशः खण्डनम् अकारि। बालकवद् बालिकानामपि यज्ञोपवीतसंस्कारसमर्थनं तेन 'पुरा युगे तु नारीणां मौञ्जीबन्धनमिष्यते' इत्यादिशास्त्रीयप्रमाणैः प्रमाणीकृतम्। स आर्षपद्धतिमनुसृत्य गुरुकुलसंस्थापनासमकालमेव कन्यागुरुकुलपद्धतिमपि प्रावर्तयत्। अस्पृश्योद्धारविषये स महात्मनो गान्धेरग्रदूतः। महाभागेन भारतदेशे विद्यमानायाः दासप्रथायाः बालविवाहस्य बहुपत्नीवादस्य धार्मिकमन्धानुकरणस्य अन्धविश्वासस्य निदानं कृतवान्।